गुणा बहुवारशब्दे उक्ताः । बहुयार इति ख्यातः । यथा, मनुसंहितायाः ।५।६। श्लोकस्य टीकायां कुल्लूकभट्टः । "शेलुं बहुवारकफलं गोभवं पेयूषं नवप्रसूताया गोः क्षीरमग्निसंयोगात् कठिनं भवति एतान् यत्नतस्त्यजेत् ॥")

बहुविधः, त्रि, (बहवो विधा यस्य ।) नानाप्रकारः । तत्पर्य्यायः । विविधः २ नानारूपः ३ पृथग्विधः ४ । इत्यमरः । ३ । १ । ८२ ॥ (यथा, गीतायाम् । ४ । ३२ ।
"एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥")

बहुविस्तीर्णा, स्त्री, (बहु यथा स्यात् तथा विस्तीर्णा ।) क्षांचिकाख्यः । इति शब्दचन्द्रिका ॥ कुचट इति भाषा ॥

बहुबीजं, क्ली, (बहूनि बीजानि यस्य ।) गन्धगात्रम् । इति शब्दचन्द्रिका ॥ आता इति भाषा ॥ अस्य गुणा आतृप्यशब्दे द्रष्टव्याः ॥

बहुवीर्य्यः, पुं, (बहु वीर्य्यं तेजो यस्य ।) विभीतकः । इति जटाधरः ॥ तण्डुलीयशाकः । शाल्मलिवृक्षः । मरुवः । इति राजनिर्घण्टः ॥

बहुवीर्य्या, स्त्री, (बहु वीर्य्यं तेजो यस्याः ।) भूम्यामली । इति राजनिर्घण्टः ॥

बहुव्रीहिः, पुं, षट्समासान्तर्गतसमासविशेषः । (मुग्धबोधमते ।) अस्य साङ्केतिकसंज्ञा हः । यथा, अन्यार्थानां द्वानां हसंज्ञः । उदाहरणं यथा । पीतमम्बरं यस्यासौ पीताम्बरो हरिः । इति वोपदेवः ॥ स च तुल्याधिकरणानां पदानां अन्यार्थत्वे स्यादिति बोध्यम् । यथा पीताम्बरादि । भिन्नाधिकरणानान्तु पुत्राय धनमस्य शिष्याय विद्या अस्य इत्यादौ न स्यात् । समाहृत इत्युदाहरणेन कदाचिद्भिन्नाधिकरणानाञ्च स्यात् धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः । एवं कामवृत्तिः उरसि लोमा कण्ठे काल इत्यादि । एवं पीताम्बर इत्युदाहरता विशेषणविशेष्ययोः समासे विशेषणमेव पूर्ब्बं स्यादिति सूचितम् । तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात् । एवं त्रिलोचनः चतुर्भुजः दीर्घकेशीत्यादि । एवं पीताम्बर इत्युदाहरता क्वचित् क्तान्तविशेषणं पूर्ब्बं स्यात् क्वचित् परं वा स्यात् इति सूचितम् । तेन अथाहृतस्वैरगतेरिति । अर्थेप्सितं भर्त्तुरुपस्थितोदयमिति । स हृतचूड़ालकाकपक्षकैरित्यादि रघुः ॥ सुखजातः सुरापीतो वृजग्धो माल्यधारक इति । एवं जातदन्तः दन्तजातः. जातश्मश्रुः श्मश्रुजातः पीततैलः तैलपीतः पीतघृतः घृतपीतः ऊढ़भार्य्यः भार्य्योढ़ः गतभार्य्यः भार्य्यागतः गतार्थः अर्थगतः अग्न्याहितः आहिताग्निः पुत्रजातः जातपुत्त्रः जातयामः यामजातः दुःखजातः जातदुःखः गड़ुकण्ठः कण्ठगड़ुः इत्यादि बोध्यम् । एवमुद्यतचक्रः चक्रोद्यतः उद्यतासिः अस्युद्यतः उद्यतगदः गदोद्यतः उद्यतखड़्गः खड़्गोद्यत इति । आयुधेभ्यो नित्यं पूर्ब्बमिति कौमराः ॥ यथा उद्यतचक्र इत्यादि । एवं सर्ब्बनामसक-लात् पूर्ब्बम् । सर्ब्बश्वेतः । संख्यासर्ब्बनाम्नोः संख्यापूर्ब्बं स्यात् । द्विपरः त्रिपूर्ब्बः । सप्तम्यन्तमचन्द्रादेः । सप्तम्यन्तं पदं पूर्ब्बं स्यान्न चन्द्रादेः । धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः उरसि लोमा कण्ठेकाल इत्यादौ उरसिजवत् ङेरलुक् । चन्द्रादेस्तु चन्द्रशेखरः चन्द्रचूड़ः पद्मनाभः शूलपाणिः कुशहस्तः । प्रियो वा । गुड़प्रियः प्रियगुड़ः । किञ्च आरूढ़ो वानरो यं स आरूढ़वानरो वृक्षः । इष्टः कृष्णो येन स इष्टकृष्णो भक्तः । दत्ता भूमिर्यस्मै स दत्तभूमिर्व्विप्रः । निर्गताः पक्षिणो यस्मात् वृक्षात् स निर्गतपक्षी वृक्षः । चत्वारो भुजा यस्यासौ चतुर्भुजो विष्णुः । बहूनि नक्षत्राणि यत्र तद्बहुनक्षत्रमाकाशम् । इति द्वितीयान्ताद्यन्यपदार्था बहुव्रीहयः सर्ब्बैर्मन्यन्ते । स्वमते तु प्रथमान्तान्यपदार्थोऽपि यथा सह मात्रा वर्त्तते योऽसौ समातृकः एवं सपक्षकः सनामकं माल्यमालिनीत्यादि । इति दुर्गादासः ॥ * ॥ (बहवो ब्रीहयो यस्येति व्युत्पत्त्या) प्रचुरधान्ययुक्ते, त्रि । यथा,—

"द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ।
तत्पुरुष ! कर्म्म धारय येनाहं स्यां बहुव्रीहिः ॥"
इति प्राचीनाः ॥

बहुशत्रुः, पुं, (बहवः शत्रवो यस्य ।) चटकः । इति शब्दचन्द्रिका ॥ (बहुशत्रुविशिष्टे, त्रि । तृतीयायां तिथौ पटोलभक्षणेन बहुशत्रुः स्यात् । यथा, तिथितत्त्वे ।
"कुष्माण्डे चार्थहानिः स्याद्बृहत्यां न स्मरेद्धरिम् ।
बहुशत्रुः पटोले स्यात् धनहानिस्तु मूलके ॥")

बहुशः, अ, (बहूनि ददाति करोत्यादि वा । बहु + "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ।" ५ । ४ । ४२ । इति शस् ।) बहूनि । इति व्याकरणम् ॥ (यथा, मार्कण्डेये । ५२ । २६ ।
"कथ्यन्ते बहुशश्चैते पिता पुत्रत्रयश्च यत् ॥")

बहुशल्यः, पुं, (बहु शल्यं यस्य ।) रक्तखदिरः । इति राजनिर्घण्टः ॥ अनेकशल्ययुक्ते, त्रि ॥

बहुशालः, पुं, (बहुभिः शालते इति । बहु + शाल + अच् ।) स्नुही । इति राजनिर्घण्टः ॥

बहुशिखा, स्त्री, (बह्वी शिखा यस्याः ।) जलपिप्पली । इति राजनिर्घण्टः ॥ (बह्वी शिखा इति कर्म्मधारयसमासः ।) अनेकशिखा च ॥

बहुसन्ततिः, पुं, (बह्वी सन्ततिर्व्विस्तारोऽन्वयो वा यस्य ।) ब्रह्मयष्टिः । इति शब्दचन्द्रिका ॥ वेडुबांश इति भाषा ॥ अनेकसन्तानयुक्ते, त्रि ॥

बहुसम्पुटः, पुं, (बहुः सम्पुटो यस्य ।) विष्णुकन्दः । इति राजनिर्घण्टः ॥

बहुसारः, पुं, (बहुः सारः स्थिरांशो यस्य ।) खदिरः । इति राजनिर्घण्टः ॥ (बहुसारविशिष्टे, त्रि । यथा, शतपथब्राह्मणे । ११ । ७ । ३ । १ ॥ "स य एष बहुसारः ।")

बहुसुता, स्त्री, (बहुः सुतः सन्ततिर्मूलं वा यस्याः ।) शतमूली । इत्यमरः । २ । ४ । १५ ॥

बहुसूः, स्त्री, (बहून् सूते या । बहु + सू + क्विप् ।) शूकरी । इति शब्दरत्नावली ॥ बहुप्रसवा च ॥

बहुसूतिः, स्त्री, (बहुः सूतिः प्रसवो यस्याः ।) बहुपत्या गौः । इत्यमरः । २ । ९ । ७ ॥ बहुसन्तानप्रसवा च ॥

बहुस्रवा, स्त्री, (बहु यथा स्यात् तथा स्रवति या । बहु + स्रु + अच् । टाप् ।) शल्लकीवृक्षः । इति शब्दचन्द्रिका ॥ अनेकक्षरणशीला त्रि ॥

बहुस्वनः, पुं, (बहुः प्रचण्डः स्वनः शब्दो यस्य ।) पेचकः । इति केचित् ॥ अनेकशब्दयुक्ते, त्रि ॥

बह्वपत्यः, पुं स्त्री, (बहूनि अपत्यानि यस्य ।) शूकरः । मूषकः । इति राजनिर्घण्टः ॥ बहुसन्तानयुक्ते, त्रि ॥

बह्वाशी, [न्] त्रि, (बहु अश्नातीति । बहु + अश् + णिनि ।) बहुभोजनशीलः । यथा, चाणक्ये । ६९ ।
"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥"
(बह्वी आशा यस्य ।) बह्वाशाविशिष्टः ॥ (धृतराष्ट्रपुत्रविशेषे, पुं । यथा, महाभारते । १ । ११७ । १९ ।
"आदित्यकेतुर्बह्वाशी नागदन्तोऽग्रयाय्यपि ॥")

बह्वृक्, स्त्री, ऋग्वेदः (बह्व्य ऋचो यस्मिन् ।) सूक्ते, क्ली । इति मुग्धबोधव्याकरणम् ॥ "बह्व्य ऋचोऽधीतया येन इति व्युत्पत्त्या ऋग्वेदज्ञ ब्राह्मणे, पुं । यथा, मनुः । ३ । १४५ ।
"यत्नेन भोजयेत् श्राद्धे बह्वृचं वेदपारगम् ॥"
केचित् बह्वृच इत्यकारान्तमिच्छन्ति ॥)

बह्वृची, स्त्री, (बह्वृचस्य ऋग्वेदज्ञस्य पत्नी । बह्वृच + ङीष् ।) ऋग्वेदवेत्तुः पत्नी । इति जटाधरः ॥ (बह्व्य ऋचोऽधेतव्या यया इति विग्रहे अध्ययननामाधेत्री स्त्री । "अनृचबह्वृचावध्येतर्य्येवेति वचनात् । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इत्यप्रत्ययः समासान्तः । "गोत्रञ्च चरणैः सह" इति जातित्वात् ङीष् । यद्यपि स्त्रीणां स्वाध्यायाध्ययनं निषिद्धं तथापि पुराकल्पेष्वेतदासीत् । यथाह यमः ।
"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा ॥"
इति ॥)

बा(वा)ड़, ऋ ङ आप्लावे । स्नाने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । आप्लावः उन्मज्जनम् । इति दुर्गादासः ॥) वोपदेवेन अन्तःस्थवकारादौ गृहीतः ॥ (बाड़ते । ऋदित् चङि न ह्रस्वः । अबबाड़त् ॥)

बा(वा)ड़वं, क्ली, (बड़वानां समूहः । बड़वा + "खण्डिकादिभ्यश्च ।" ४ । २ । ४५ । इत्यञ् ।) बड़वासमूहः । इत्यमरः ॥ (बड़वाया इद-